"जागुड़ान् रामठान् हूणान् स्त्रीराज्यानथ तङ्गणान्" भा० । ब० व० । तत्र भवः अण् । ३तद्देशभवे त्रि० । ४कुङ्कुमे न० । "अवनिं जागुड़कुङ्कुमाभिताम्राम्" माघः ।

**जागृ** निद्राभावे अदा० पर० अक० सेट् जक्षा० । जागर्त्ति जार्ग्रति अजागरीत् । जागराम्—बभूव आस चकार जजागार । अस्य णपि वृद्धिः तद्भिन्ने ञिति णिति च गुणः विन्भिन्ने सर्वत्र आर्द्धधातुके गुणः । जागर्य्यते अजागरि जागरयति कर्म्मणि अजागरि अजागारि इति भेदः "कुसुमशरस्तु ज्जागरयति" उद्भटः । जागरकः । जागृविः "जागर्त्ति लोको ज्वलति प्रदीपः" उद्भटः । इन्द्रियादिना बोधे प्रबोधे च । "या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" गीता । "पन्नगगवीगुम्फेषु चाजागरीत्" मल्लि० ।

**जागृवि** पु० जागृ—क्विन् न गुणः । १नृपे उज्ज्वल० तस्य स्वकार्य्येऽप्रमत्तत्वात् तथात्वम् । २अग्नौ हेम० ३जागरणशीले त्रि० "समानमज्मन् पर्य्येति जागृविः" ताण्ड्य० ब्रा०१।७।६ । "जागृविः जागरूकः" भा० "विभीदको जागृविर्मह्यमच्छान्" ऋ० १०।३४।१ । "जनस्य गोपा अजनिष्ट जागृविरग्निः" ऋ० ५।११।१ ।

**जाग्रत्** त्रि० जागृ—शतृ । १जागरणकर्त्तरि २सावधाने अप्रमत्ते ३प्रकाशमाने च । "जाग्रत्कलङ्कैरवध्वंसं हस्तयते च या सुमनसामुल्लासिनी मानसे" चन्द्रालोकः । स्त्रियां ङीप् । जीवानां श्रोत्रादिभिः ४शब्दादिविषयज्ञानावस्थाभेदे सा च त्रिधा "प्रमितिर्जागरे जाग्रद्भ्रमः स्वप्नोऽथ मूढ़ता । पानादिजन्या सुप्तिः स्यादेवं जागरणं त्रिधा" शब्दार्थचि० धृतवाक्यम् । "एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम्" मनुः । "जाग्रत्स्वप्नः सङ्कल्पः पापः" ऋ० १०।१६४।५ । "जाग्रत्स्वप्नावस्थयोः सम्बन्धी पापः" भा० । "जाग्रत् स्वप्नसुषुप्तिधामरहितः प्राप्तः प्रबोधोदयः" प्रबो० । [ रायमुकुटः ।

**जागर्य्या** स्त्री जागृ—भावे यक् गुणः रिङादेशः । जागरणे

**जाघनी** स्त्री जघनस्य समीपं शैषिकोऽण् ङीप् । १ऊरौ त्रिका० जघनस्यार्द्धे जघनैकदेशे भवः अण् ङीप् । २पुच्छकाण्डे "अथ जाघन्या पत्नीः संयाजयन्ति जघनार्द्धं जाघनी जघनार्द्धाद्धि योषायै प्रजाः प्रजायन्ते" शत० ब्रा० ३।८।५।६ । "जाघनी वालदण्डः" भा० । "वनिष्ठु जाघनि चावद्यति" कात्या० श्रौ० ६।७।१० तत्र जाघनीशब्दस्य मतभेदेन कर्केण नानार्थतोक्ता यथा "जाघनी जघनप्रदेशे भवा पुच्छदण्ड इत्यर्थः जाघनी पशोः पुच्छमिति हरिस्वामिना । जाघनी बालदण्ड इति माधवाचार्य्यः । "जाघनी येन मशकानपनयतीति धूर्त्तस्वामिनः । जाघनी बालधिरुच्यत इति ज्ञानदीपिकाकारः । क्षुधार्त्तश्चात्तुमभ्यगाद्विश्वामित्रः श्वजाघनीम् । चण्डालहस्तादादाय धर्माधर्मविचक्षणः" (मनुः) इत्यत्र श्वजाघनीम् श्वपुच्छमिति स्मृतिचन्द्रिकाकारो व्याख्यातवान् । जाघनी पशोः पुच्छमित्यधिकरणमालायाम् तृतीयेऽध्याये । जाघनी चैकदेशत्वादित्यधिकरणे जाघनी कटी इति पितृभूतिहरिहरौ तदयुक्तम् कटिशब्दस्य श्रोणिपर्य्यायत्वात् श्रोण्योश्च प्रागुक्तत्वादिति अतः पुच्छकाण्डमेव जाघनीशब्देनोच्यते इति । विश्वामित्रस्य जाघनीहरणकथा प्रसङ्गादुच्यते ।

"विश्वामित्रोऽथ भगवान् महर्षिरनिकेतनः । क्षुधापरिगतो धीमान् समन्तात् पर्य्यधावत । त्यक्त्वा दारांश्च पुत्रांश्च कस्मिंचित् जनसंसदि । भक्ष्याभक्ष्यसमो भूत्वा निरग्निरनिकेतनः" इत्युपक्रमे "स ददर्श श्वमांसस्य कुतन्त्रीं विततां मुनिः । चाण्डालस्य गृहे राजन् ! सद्यः शस्त्रहतस्य वै । स चिन्तयामास तदा स्तैन्यं कार्य्यमितो मया । न हीदानीमुपायो मे विद्यते प्राणधारणे । आपत्सु विहितं स्तैन्यं विशिष्टस्य महीयसः । विप्रेण प्राणरक्षार्थं कर्त्तव्यमिति निश्चयः । हीनादादेयमादौ स्यात् समानात्तदनन्तरम् । असम्भवे वाददीत विशिष्टादपि धार्मिकात् । सोऽहमन्त्यावसानाय हराम्येनां प्रतिग्रहात् । न स्तैन्यदोषं पश्यामि हरिष्यामि श्वजाघनीम्" । इति निश्चित्य तां हर्त्तुमुपक्रान्तस्य चण्डालेन सह संवादो यथा "विश्वामित्रस्तु मातङ्गमुवाच परिसान्त्वयन् । क्षुधितोऽहं गतप्राणो हरिष्यामि श्वजाघनीम् । क्षुधितः कलुषं यातो नास्ति ह्रीरशनार्थिनः । क्षुच्च मां दूषयत्यत्र हरिष्यामि श्वजाघनीम् । अवसीदन्ति मे प्राणाः श्रुतिर्मे नश्यति क्षुधा । दुर्बलो नष्टसंज्ञश्च भक्ष्याभक्ष्यविवर्ज्जितः । सोऽधर्मं बुध्यमानोऽपि हरिष्यामि श्वजाघनीम् । अटन् भैक्ष्यं न विन्दामि यदा युष्माकमालये । तदा बुद्धिः कृता पापे हरिष्यामि श्वजाघनीम्" भा० शा० १४१ अ० । कथाशेषस्तत्र दृश्यः

**जाङ्गल** पु० जङ्गले भवः जङ्गलप्रायो वा अण् । १वनप्राये २जङ्गलस्थपशुमांसे तत्रत्ये ३उदके च शब्दार्थचि० । "अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः । स ज्ञेयो